अतएव मध्यन्दिनस्नानाधिकारे विवस्वान्।
मन्त्रसम्भारसंयुक्तमुपस्पर्शनमुच्यते ।
स्नानेऽवगाहने चैव स्नावनं विधिवर्जितमिति ॥
इति स्नानार्थं ग्राह्याणि वर्ज्यानि चोदकानि ।

अथ स्नानसम्भाराः ।

तत्राह दक्षः ।

चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् ।
तिलपुष्पकुशादीनि स्नानं वा कृत्रिमे जले ॥

अष्टधा विभक्तस्तुर्थो भागोऽत्र ज्ञेयः ।

योगयाज्ञवल्क्यः ।

मृत्तिकान् गोमयं दर्भान् पुष्पाणि सुरभीणि च ।
आहरेत्स्नानकाले तु स्नानार्थं प्रयतः शुचिः ।
गन्धोदकान्तं विधिवत् क्रमात् स्थाप्यं पृथक्छुचौ ॥

शौनकः ।

नदीतीरे शुचौ देशे आहरेन्मृत्तिकां कुशान् ।
प्रयतो मृदमादाय दूर्वापामार्गगोमयं ।
एकदेशे पृथक् कुर्यात्मृदः स्तोकं ततः क्रमात् ॥

जाबालिः ।

ततश्च मृत्तिकां शुद्धामदुर्गन्धामनूषरां ।
शुचिदेशादतिश्लक्ष्णां कायशुद्ध्यर्थमाहरेत् ॥
अमेध्याशनशून्यानां नीरुजानां तथा गवां ।
अव्यङ्गानाञ्च सद्यस्कं शुचि गोमयमाहरेत् ॥

मुच्यते पातकैः सर्वैर्यदि न ब्रह्महा भवेत् ॥

हारीतोऽपि ।

जृम्भका नाम गायत्री वेदे वाजसनेयके ।

अन्तर्जले सकृज्जप्त्वा ब्रह्महत्यां व्यपोहति ॥

जृम्भकाय स्वाहा इति मन्त्रः ।

सुमन्तुरपि ।

मातरम्भगिनीं गत्वा मातृस्वसारं स्नुषां सखीं वान्यदागम्यागमनं कृत्वा अघमर्षणसूक्तमन्तर्जले त्रिरावर्त्य तदेतस्मात् पूतो भवति ।

हारीतोऽपि ।

आपद्गतः पृथिव्यक्रमीदित्येतामृचन्त्रिरन्तर्जले जपन् सर्वस्मात्पापात् प्रमुच्यते । हंसः शुचिषदित्येतामृचन्त्रिरन्तर्जले जपन् सर्वस्मात्पापात् प्रमुच्यत इति ।

गौतमोऽपि ।

अपि वा गायत्रीं पच्छोऽर्द्धर्चशः सर्वामिति त्रिरन्तर्जले पठन् सर्वस्मात्पापात् प्रमुच्यत इति ।

दक्षः

मार्जनं जलमध्ये तु प्राणायामो यतस्ततः ।

उपस्थानं जपः पश्चात् सावित्रीजप उच्यते ॥

आश्वलायनगृह्यं ।

सवस्त्रोऽहरहराप्लवेताशुत्थायोदकोन्यद्वस्त्रमाच्छादयेत् ।

अत्रापि जलमध्ये स्नानाङ्गतर्पणं विधेयं । असामर्थ्ये तु पूर्वोक्तेन प्रकारेण संक्षेपस्नानं कर्त्तव्यं ।

स्वधानमस्तर्पयामि । अमात्यान् स्वधानमस्तर्पयामि । अमात्यपत्नीः स्वधानमस्तर्पयामि । सर्व्वान् स्वधानमस्तर्पयामि । सर्व्वपत्नीः स्वधानमस्तर्पयामि । इत्यमुक्त्वार्घ्यं अपउत्सिञ्चति "ऊर्ज्जं वहन्तीरमृतं घृतम्पयः कीलालं परिस्रुतं । स्वधा स्थ तर्पयत मे पितॄन् तृप्यत तृप्यत" इति । नार्द्रवासा नैकवस्त्रो दद्यात् कर्माण्यनुमन्त्रयेत् पितृकर्माणि चैतेषां ।

इति बौधायनोक्ततर्पणं ।

अथ शङ्खोक्ततर्पणं ।

स्नातः कृतजप्योऽन्तर्जानुः उदङ्मुखस्तिष्ठन् तीर्थेन देवानुदकेन तर्पयेत् ।

अथ तर्पणविधिः ।

भगवन्तं शर्वं तर्पयामि इति प्रत्येकमस्तर्पयामीति ऋष्यो ढ्राद्यन्ते लिखिता न सन्ति पुस्तकतालपत्रोद्धृत्य इति । कालाग्निरुद्रं शतरुद्रमजितं रुक्मभौमं शैलभौमं नीलभौमं रक्तभौमं पीतभौमं श्वेतभौमं कृष्णभौममितिपातालसप्तकं । जम्बूद्वीपं शाकद्वीपं कुशद्वीपं क्रौञ्चद्वीपं शाल्मलिद्वीपं गोमेदं पुष्करद्वीपं प्लक्षद्वीपमिति द्वीपसप्तकं । लोकालोकाख्यं पर्वतं सधामानं शङ्कुपदं केतुमन्तं हिरण्यरोमाणमिति कल्पस्थायिनो लोकपालान् । लवणं क्षीरोदं दध्योदं घृतोदकं सुरोदकं इक्षुरसोदकं स्वादूदकमिति समुद्रसप्तकं । सागरचतुष्कं । शृङ्गवन्तं श्वेतं नीलं मेरुं माल्यवन्तं गन्धमादनं निषधं हेमकूटं हिमवन्तमिति महाचलान् । महेन्द्रं मलयं सह्यं शुक्तिमन्तं ऋक्षवन्तं विन्ध्यं पारियात्रमिति सप्तकुलपर्वतान् । कैलास-मैनाकप्रमुखान् सर्वपर्वतांश्च बिन्दुप्रमुखानि सरांसि सप्तप्रवाहां गङ्गां त्रिलोकवाहिनीं

दर्भपाणिर्द्विराचम्येत्यादिवक्ष्यमाणक्रतुवचनाद्यजमानो ब्राह्मणचरण-क्षालनोदकसंसर्गमकुर्वन् स्वपादप्रक्षालनपूर्वकं द्विराचम्य ब्राह्मणैः सह श्राद्धभूमिमागत्य श्राद्धसिद्धिरस्त्विति भवन्तोब्रुवन्त्विति ब्राह्मणान् प्रत्युक्त्वा तैश्चास्तु श्राद्धसिद्धिरित्युक्ते तदुपवेशनार्थमासनान्युपकल्पयेत्।
तथा च यमः।

ततः सिद्धिमिति प्रोच्य कल्पितेष्वासनेषु च।

आध्वमित्यादिनोत्तरेण सम्बन्धः।

इति ब्राह्मणाक्षालनादिश्राद्धसिद्धिवाचनान्तं।

अथ ब्राह्मणोपवेशनार्थमासनोपकल्पनं।

आहात्रिः।

तत्रासनानि देयानि तिलांश्चैव कुशैः सह।
पृथक् पृथगासनेषु तिलतैलेन दीपिकाः॥

तत्र श्राद्धदेशे आसनानि देयानि कुशैः सहितास्तिलाश्च देयाः श्राद्धभूमौ प्रक्षेपणीया इत्यर्थः। पृथक् प्रत्येकैकस्यासनस्य समीपे एकैका दीपिकेत्येवन्ताः देयाः, अयश्च देयानीत्यस्य विपरिणतस्यानु-षङ्गः। अथवा तेष्वासनेषु पृथक् पृथक् कुशैः सह तिला देया इति सम्बन्धः। तिलतैलग्रहणं घृतादिप्रशस्तस्नेहोपलक्षणार्थं। तस्माद्यप्रशस्त-स्नेहनिवृत्त्यर्थञ्च। आसनानि च प्रशस्ततरत्वात् सति सम्भवे कुतपा-[illegible]कम्बलमयानि वृषीरूपाणि वा देयानि। प्रशस्ततरत्वञ्च तेषां श्राद्धकल्पप्रकरणेऽभिहितं, तदलाभे प्रशस्तयज्ञियकम्बल-श्रीपर्ण्यादिदारु-मयाणि तदलाभेऽप्यनिषिद्धदारुमयाणि।
आसनविशेषे निषेधमाह मार्कः।

कवचनाद्देकस्यैव श्रैष्ठ-प्राथम्याभ्यां प्रथमोपविष्टस्यैवेति। यैर्द्दैविककर्म-धर्म्मेण यज्ञोपवीतेन स्वाहाकारेण चायं होमः क्रियते तैर्द्दैविक-विप्रकरे कर्त्तव्यः। यैस्तु पैतृककर्मधर्म्मेण प्राचीनावीतेन स्वधा-शब्देन च क्रियते तैस्तु पैतृकविप्रकरे कार्य्यः। सर्व्वैर्वा देव-करे पैतृककरे वा विकल्पेन कार्य्यः। यद्यपि करशब्दः साधारणस्तथापि दक्षिणकरेण कर्त्तव्यमिति दक्षिणस्य सर्व्वकर्मार्हतास्मरणात् पाणौ दद्यात्तु दक्षिणे इति वचनाच्च दक्षिण एव करे होमः। तत्र तावत् प्रथमोपविष्टस्य पैतृकस्य पाणौ होम इत्याह कात्यायनः।

पित्र्योयः पङ्क्तिमूर्द्धण्यस्तस्य पाणावनग्निकः।

हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्॥

अनग्निकः श्राद्धकर्त्ता पितृ-पितामहाद्युद्देशेन त्यज्यमान-हविरधि-करणभूतविप्रपङ्क्तिमूर्द्धण्यपविष्टस्य दक्षिणे करे अग्नये कव्यवाहनाये-त्यादिमन्त्रयुक्तं हुत्वा हुतशिष्टं अन्नं तूष्णीमेव पङ्क्तिमूर्द्धण्यादन्येषां तत्पङ्क्त्युपविष्टानामेव पात्रेषु विभज्य निदध्यान्न तु देवपङ्क्त्युपविष्टानां पात्रेषु। शेषप्रतिपत्तौ चेदमभिधास्यते। ननु समुदास्याग्नौ द्वे आहुती जुहोति देवेभ्य इति पितृयज्ञसंज्ञके होमे कव्यवाहनस्याग्नेः सोमस्य पितृमतोदेवस्याग्नौकरणहोमस्यापि दैविकत्वेन समानधर्मक-त्वेन सन्निधानाद्दैविकविप्रकरे होमे प्राप्ते कथं पैतृकविप्रकर एवोक्तः। अथोच्यते। योऽग्नावग्नौकरणहोमः स दैविकः, यस्तु विप्रकरे स पैतृकः "पाणिष्वेव वा जुहोत्यग्निमुखा वै देवाः पाणिमुखाः पितर इति ह ब्राह्मणं" इत्याश्वलायनगृह्ये श्रुतेरुद्भावनादिति। मैवं। "जुहोति दे-वेभ्य." इति विधिश्रुतेर्द्दैवदेवत्यत्वेऽस्य होमस्यावधारिते "पाणिमुखाः

पितरः" इति पाणिविधिस्त्वर्थवादमात्रेण न पितृदेवत्यत्वं प्रत्येतुं शक्य पितृदेवत्यविप्रभोजन-पिण्डप्रदानरूपकर्मसाहित्यात् पैतृकत्वारोपणार्थवादोपपत्तेः। अथवा अग्नौकरणहोमस्यापि पितृतृप्तिरेव भाव्येति परम्परया पाणेरपि तृप्तिकारणत्वेन पितृमुखत्वमारोप्य स्तुत्युपपत्तेः अतोऽयमग्नौकरणहोमः कचिद्दैविकः कचित्पैतृक इत्येतदयुक्तं।

तदाहुः।

दैवमग्नौ करे पित्र्यमित्येतदसमञ्जसं।
दैवञ्चेत् सर्वदा दैवं पित्र्यञ्चेत्पित्र्यमेव तु॥ इति।

अतोदैवविप्रकरे होमः कार्य्यः।

तथाचाह काश्यपः।

अनग्निको यदा विप्रः श्राद्धं कुर्य्यात्तु पार्व्वणं।
अग्नौकरणवत्तत्र होमो दैवकरे भवेत्॥ इति।

अत्र प्रतिवैश्वदेविकद्विजं होमावृत्तौ न्यायामभ्यासादेकस्यैव गौरवात् विप्रस्य कर इत्येकवचनात्तस्यैव समास. तथाच [illegible] देकस्यैव देवस्य।

तदुक्तं वायुपुराणे।

वैश्वदेवे यदैकस्मिन् भवेयुर्बहवो द्विजाः।
तदैकपाणौ होतव्यं स्याद्विधिर्विहितमाया॥ इति।

यदा तावदेककमुभयत्र वैश्वदेविके पित्र्ये च एक एव द्विजस्तदैकस्यैव पाणाविति सिद्धमेव। यदापि द्वौ दैवे इत्यादिवृद्धसंख्यानेकद्विजपक्षाश्रयणं द्वौ चत्वारः पञ्च वा दैविके द्विजास्तदा एकस्यैव पाणौ होमः कार्य्यः। तावतैव हि होमविधिः कृतार्थः

स्वकीयेनोत्तानेन करेणाङ्गुष्ठग्रहणं न कार्यं तथाकरणे हि तेनैव दोषस्योक्तत्वात्।

उत्तानेन तु हस्तेन द्विजाङ्गुष्ठनिवेशनं।
यः करोति द्विजः(१) मोहात्तद्वै रक्षांसि गच्छति॥

इति पात्रालम्भ-जपाङ्गुष्ठनिवेशनानि।

अथान्नसंकल्पः।

तत्र पित्राद्युद्देशेनान्नसंकल्पं करिष्यन् गोत्र-सम्बन्ध-नामविशिष्टान् वस्वादिरूपयुक्तान् पितॄन् देवतात्वेन, अन्नं हविःशब्देन, ब्राह्मणानाहवनीयार्थत्वेन, श्राद्धभूमिं गयात्वेन, भोक्तॄन् गदाधरत्वेन, अन्नपात्रं राजतत्वेनानुचिन्त्यानुचिन्तनदार्ढ्यार्थं तथानुकीर्त्तयेत्।

प्रभासखण्डे।

द्विजपात्रेषु दत्त्वान्नं कृत्स्नं सङ्कल्पमाचरेत्।
दर्व्यादिस्थेन नो तेषां सम्बन्धो दृश्यते यतः॥

प्रकृतश्राद्धसिद्ध्यर्थं सम्पादितेभ्यो नानाजातीयान्नसमुदायेभ्यः सर्वेभ्योऽप्येकैकद्विजतृप्तिपर्याप्तसमुदायान्तरनिष्पादनसमर्थतया सम्पादितपरिमाणानेकदेशानुद्धृत्य द्विजानां पुरतः स्थापितेषु भोजनपात्रेषु परिवेष्य सङ्कल्प्य पित्राद्युद्देशेन त्यागं कुर्यात्। यतोदर्व्यादिस्थितिमात्रेण तेषां पित्रादीनां तेनान्नेन सह सम्बन्धो नोत्पद्यते किन्तु सङ्कल्पनेनेति सङ्कल्पं कुर्यादित्यर्थः। कृत्स्नमन्नं पात्रे दत्त्वा सङ्कल्पं कुर्यादित्युक्तेऽपि पात्रसङ्कोचे सति परस्परसङ्करेण स्वादुतोपघातकानि यानि चान्योन्यप्राप्तपरिवेषणकालानि च यानि विस्मृत्य

(१) नरः इति ख०।

पूर्वं न परिविष्टानि परिविष्टान्यपि पुनर्द्विजापेक्षितत्वेनावगतानि तानि भुञ्जानेष्वपि द्विजेषु परिवेषणीयान्येव। प्रसिद्धभोजनप्रकारानुग्रहस्य श्राद्धेऽपि सम्मतत्वात्।

अत्र केचिदाहुः।

> शुचिना शुचये देयं सम्प्रदेयञ्च यच्छुचि।
> सम्प्रदानस्य दुष्टत्वादत एवं न युज्यते॥

इति सम्प्रदानस्योच्छिष्टकृतेनाशुचित्वेन दुष्टत्वात् भुञ्जानेषु दानं न युज्यत इत्यर्थः। किञ्च सङ्कल्पोत्तरकाले दीयमानं पितॄन् सम्बध्यत इत्यनर्थकमेव स्यादिति।

अत्रेदमुच्यते।

भवेदेष दोषस्तस्य यः परिविष्टमात्रस्य सङ्कल्पं कुर्यात्। न तु यः परिवेक्ष्यमाणस्यापि सम्प्रदानत्व-शुचित्वकाल एव सङ्कल्पं करोति तस्यापि। अत एव परिविष्टं परिवेक्ष्यमाणञ्चेति सर्वेऽपि शिष्टाः सङ्कल्पवाक्यं प्रयुञ्जते। सङ्कल्पश्च कर्त्तृनिर्णयप्रिकाण्डमण्डनेन कृतः।

> त्यागन्तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः।
> उभावप्यसमर्थौ चेत् नियुक्तः कश्चन त्यजेदिति॥

'तयोः' दम्पत्योर्मध्ये, अन्यतरः। त्यागश्चायं द्विजपाणिष्वपोशानजलसदृत्वैव कार्यः। तस्यान्यथाकरणे दोषमाहात्रिः।

> अपोशानकरे विप्रे सङ्कल्पं यः समाचरेत्।
> तदन्नमसुरैर्भुक्तं पितॄणां नोपतिष्ठत इति॥

अत्रास्य सङ्कल्पस्य वैशदेविकपूर्वकत्वं प्रयोगवाक्यकदेशश्च विष्णुना प्रतिपादितः।

सृगं। एवमनेकविधमुद्दणीयतमरमं वहन्त्योभूत्वा पितॄणां अक्षय्यां तृप्तिं कुरुतेत्यर्थः।

कठानां श्राद्धकल्पेत्वेतत्मन्त्रमाध्यक्योदकनिषेचनस्य परिषेचन-रूपतोक्ता। ऊर्ज्जं वहन्तीरित्यप परिषिच्येति।

परिसमन्तात् त्यक्त्वा 'परिषिच्य', परिषेचनञ्चाप्रदक्षिणं कर्त्तव्यं पित्र्यत्वात्।

आपस्तम्बगृह्ये तु त्रिः पिण्डपरिषेचनं। तत्र च मन्त्रान्तरमुक्तं। उत्तरयोदपात्रेण त्रिः प्रसव्यं परिषिच्येति।

अस्यार्थः। पुत्रान् पौत्रानभितर्पयन्तीरपोमधुमतीरिमाः। स्वधा पितृभ्यः अमृतं दुहाना आपोदेवीरुभयांस्तर्पयन्त्वित्येतया ऋचा उदकपूर्णपात्रेण सर्वान् पिण्डान् प्रसव्यं त्रिः परिषिञ्चेदिति।

विष्णुना तृप्यध्वमित्यनेन मन्त्रेण सोदकस्यान्नस्य पिण्डानां समन्ता-दप्रदक्षिणं विकिरणमुक्तम्।

ऊर्ज्जं वहन्तीरित्यनेन सोदकेनाप्रदक्षिणं पिण्डानां विकिरणं कृत्वेति।

शौनकाचार्य्येणसूत्रे तु मन्त्रान्तरसहितमन्नेन परिविकिरणमुक्तं। इदमाशंसुनामिदमाशंससानानामित्यन्नेन प्रसव्यं परिविकिरणमिति।

पिप्पलादश्राद्धकल्पे तु पिण्डशेषान्नमिश्रतण्डुलप्रविकिरणमुक्तम्। इदमाशंसुनामिति शेषेण त्रिः प्रसव्यं तण्डुलान् प्रकिरेदिति।

अन्नविकिरणानन्तरमाह विष्णुः।

अर्घ्य-पुष्प-धूपानुलेपनान्नाद्यभक्ष्य-भोज्यानि निवेदयेदुदपात्रं मधुं लाभ्यां मयुतञ्चेति।

अभिप्रेतार्थसिद्ध्यर्थमिष्टान् कामांस्तु वाचयेत्।
दीर्घाः सूर्य्यद्युता नद्यो विष्णोस्त्रीणि पदानि च।
एवमेषां प्रमाणेन दीर्घमायुरवाप्नुयां ॥
दक्षिणायाश्च सर्वत्र यजुर्देयं तथास्तु नः।
एवमस्त्विति तैर्वाच्यं मूर्द्ध्रा ग्राह्यञ्च तेन तत् ॥

आशीःप्रतिग्रहानन्तरं यजमान-तत्पुत्र-पौत्रादयः पितृदेवता-नमस्करणं कुर्य्युरिति कश्चित्। इह ब्राह्मणविसर्जनात्पूर्वकालमन्ववा-यस्याशीःप्रतिग्रहणानन्तरं पिण्डोद्धरणं कृत्वा स्वस्तिवाचनं कार्य्य-मिति यद्यपि पूर्वोक्तमत्स्यपुराणवाक्ये दर्शितं तथापि स्वस्तिवाचनात् पूर्वं पात्रचालनं कर्त्तव्यं।

अत एव प्रचेताः।

ततस्तु स्थापयेत् पिण्डान् विप्रपात्राणि चैव हि। इति।

अकृत्वा तु पात्रचालन-स्वस्तिवाचने दोषमाह नारायणः।

अचालयित्वा तत्पात्रं स्वस्ति कुर्वन्ति ये द्विजाः।
निराशाः पितरस्तेषां शप्त्वा यान्ति यथागति ॥

वृहस्पतिरपि।

भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः।
तदन्नमसुरैर्भुक्तं निराशैः पितृभिर्गतैः ॥

भविष्योत्तरेऽपि।

भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः।
तेषां निराशाः पितरो भवेयुर्गाह्यमर्दिताः ॥

पात्रचालने कांश्चित् कर्त्तृत्वेनोपदिश्य कांश्चिन्निषेधति श्राद्धकल्पः।

दातार इत्यादिकं श्लोकमुक्का धन्योऽहमनुगृहीतोऽहं भवद्भिर्मद
र्थार्थमेतावतं क्लेशमङ्गीकृतवन्तो भवन्तः यथाकथञ्चित् सम्पादि
तानेन यूयमेवंविधाः श्रमं प्रापिताः स्थ तदस्माकं सर्वं भवा
नुमन्यतां। भवत्प्रसादादद्य मे पितरः स्वर्गलोकं प्राप्ता इत्यादिक
द्विजान् प्रति प्रिया वाचश्च वदेत् ।

बृहस्पतिप्रोक्तः प्रियवागुपोमन्त्रश्च जप्तव्यः ।

स च ।

अद्य मे सफलं जन्म भवत्पादाभिवन्दनात् ।

अद्य मे वंशजाः सर्वे यातावोऽनुग्रहाद्दिवं ॥

पत्र-शाकादिदानेन क्लेशिता यूयमीदृशाः ।

तत्क्लेशजातं चित्तात्तु विस्मृत्य चन्तुमर्हथेति ॥

तदनन्तरं सर्वं सम्पूर्णमस्त्विति विप्राः प्रार्थयितव्याः।

तथा च विष्णुः ।

मन्त्रहीनं क्रियाहीनं सम्पद्धीनं द्विजोत्तमाः ।

श्राद्धं सम्पूर्णतां यातु प्रसादाद्भवतां ममेति ॥

विप्रैस्तु सर्वं सम्पूर्णमित्युक्का अन्नगुणप्रशंसा कर्त्तव्या ।

तथा च वसिष्ठः ।

श्राद्धावसाने कर्त्तव्या द्विजैरन्नगुणस्तुतिरिति ।

अथ गुणस्तुतिः मधुरादिगुणानां पृथक् पृथक् न कर्त्तव्या वि
शोभनं हविरित्येवमेव ।

तथा च स्मृतिः ।

हविर्गुणा न वक्तव्या वक्तव्यं शोभनं हविरिति ।

बन्दि-मागध-सूताश्च तौर्यत्रिकविदस्तथा ।
अलब्धलाभाः श्राद्धेषु नाशयन्ति महद्यशः ।
तस्मात्तेऽपि विभक्तव्याः सकलं संविभज्य च ॥

'वृथाजाताः' षण्ढान्ध-पङ्ग्वादयः । बन्द्यादयः पूर्वमेव व्याख्याताः । 'तौर्यत्रिकं' नृत्य-गीत-वाद्यानि । 'अलब्धलाभाः' अप्राप्ताशाः, 'विभक्तव्याः' अत्र भागिनः कर्त्तव्या इति । एवं ज्ञात्यादीन् भोजयित्वा स्वयमपि भुञ्जीत ।

तथा च निगमः ।

अनुज्ञातो गृहान् बाल-वृद्धांश्च परितोष्य भुञ्जीतेति ।

'अनुज्ञातः' इष्टैः सह भुज्यतामित्येवं श्राद्धभोक्तृभिरनुज्ञातः । अनेन श्राद्धशेषमन्नं भुञ्जीत नान्यदित्यपि सूचितं ।

अतएवाह शातातपः ।

शेषमन्नमनुज्ञातं भुञ्जीत तदनन्तरं ।
इष्टैः सार्द्धन्तु विधिवद्बुद्धिमान् समाहितः ॥

'इष्टैः सार्द्धमित्यनेन स्वपङ्क्तिभोजिभिः सहैकपङ्क्ताविन्युच्यते । 'विधिवदित्यनेनापोशानादीतिकर्त्तव्यताविशिष्टता पात्रधारण-मौनादिनित्यभोजनधर्मयुक्तता च प्रतिपादिता । 'बुद्धिमान्' भोजनविधिज्ञः । 'समाहितः' पाण्यादिचापलरहितः ।

तत्र मौनयुक्तता भविष्योत्तरे दर्शिता ।

मित्र-बन्धुजनैः सार्द्धं शेषभुञ्जीत वाग्यतः ।

'सार्द्धमित्यनेनैकपङ्क्तावित्यपि लभ्यते । एवमुत्तरत्रापि व्याख्येयं ।

अथ ज्ञाति-भृत्यभोजनानन्तरमुक्तं ।

अद्यत्यममुकस्येति स्थाने वैवोपतिष्ठताम् ॥
इति ब्रूयात् प्रयत्नेन कर्त्ता विप्रविसर्जने।
अभिरम्यतामिति ब्रूयात् ब्रूयुस्तेऽभिरताः स्म च।
प्रतिमासं भवेदेतत्कार्य्यमावत्सरान्नरैः ॥

बौधायनसूत्रे।

अथैकोद्दिष्टेषु नाग्नौकरणं नातिश्रयणं न पूर्वं न दैवं न धूपं न दीपं न स्वधा-नमस्कारौ नात्रापूपं सर्व्वं सिद्धं समानीयायुग्मान् ब्राह्मणान् सुप्रक्षालितपाणिपादानप आचमय्य दर्भोपकॢप्तेष्वासनेषु उपवेश्य सर्व्वस्मात् सकृत् सकृत् समवदायाभिघार्य्य दक्षिणतो भस्मनि-आनङ्गाराभिहत्य तेषु जुहुयात्। प्रेतायामुष्मै यमाय स्वाहेति तद्धुतमहुतस्य चन्त्यमुष्मै तृप्तिरस्त्वित्यपां प्रतिग्रहणं विसर्जनमामुष्मा-उपतिष्ठत्यनुद्दिश्य येष्वेव पिण्डदानं तृप्यस्वेति संचालनं तृप्तिर-स्त्विति विसृजेत्। नमोऽस्तु तृप्तिरितीतरेषां प्रतिवचनं ऽतस्य द्वितीयाप्रभृतिब्राह्मणैरेकोत्तरवृद्धिरादशाहादत्र नवं विच्छिद्यतैका-दश्यां श्राद्धं तृतीये पक्षे द्वितीयं सन्ततमेकैकेनैकादशमासानयन्ति तद्द्वादशमासमभ्यारोहति

बौधायनः।

एकोद्दिष्टं स एव स्याद्द्वादशेऽहनि वा पुनः।
अथवोर्द्धमयुग्मे तु कुर्वीताह स्वशक्तितः ॥
अर्द्धमासेऽथ मासे वा ऋतौ संवत्सरेऽपिवा।
निमन्त्रणन्तु पूर्वेद्युर्दैवमग्नौकृतिस्तथा ॥
न स्वधाश्रावणापूप-धूप-दीपौ नमस्कृतिः।

भविष्योत्तरे ।

प्रमादादिच्छया वापि नागाद्वा सर्पतोमृतः ।
पञ्चयोरुभयोर्नागान् पञ्चमीषु प्रपूजयेत् ॥
कुर्य्यात् पिष्टमयीं लेखां नागप्रतिकृतिं भुवि ।
अर्च्चयेत्तां सितैः पुष्पैः सगन्धैश्चन्दनेन तु ॥
प्रदद्याद्धूप-दीपञ्च तण्डुलांश्च सितान् क्षिपेत् ।
आमपिष्टं तथैवान्नं क्षीरञ्च विनिवेदयत् ॥
उपस्थाय वदेदेवं मुञ्च मुञ्चामुकन्त्विति ।
मधुरन्तद्दिने दद्यादेवमब्दं समाचरेत् ॥
सौवर्णं शक्तितोनागं ततोदद्याद्द्विजोत्तमः ।
गां सवत्सान्ततोदद्यात् प्रीयतां नागराडिति ॥
यथा विभागङ्कुर्वीत कर्माणि प्राकृतान्यपि ।
नागाद्विमोचणार्थन्तु प्रोक्तमप्यधिकन्त्विदम् ।
द्विजान् विमोचयित्वा तु सम्प्रीताः सन्तु पन्नगाः ॥

इति नागपूजाविधिः ।

अथ प्रोषितमृतदाहादिप्रयोगः ।

तत्र षट्त्रिंशन्मते ।

देशान्तरगताः केचिदवृष्टा ये मृताः श्रुताः ।
कथमेषां क्रियाः कार्य्या दहनाद्याः सविस्तराः ॥

अथ कालविशेषमाह वृद्धमनुः ।

प्रोषितस्य यदा कालो गतश्चेद्दादशाब्दिकः ।
प्राप्ते चयोदशे वर्षे प्रेतकर्माणि कारयेत् ॥

तत्र शातातपः ।

प्रदानं यत्र यत्रैषां सपिण्डीकरणात्परं ।
तत्र पार्वणवच्छ्राद्धं ज्ञेयमभ्युदयार्थिना ॥
ये सपिण्डीकृताः प्रेता न तेषान्तु पृथक्क्रिया ।
न पृथक् पिण्डदानं तु तस्मादूर्द्ध्वं विधीयते ।
प्रेतत्वाच्चेह निस्तीर्णाः प्राप्ताः पितृगणांस्तु ते ॥

एतस्यैवमत एव पुनराह ।

यः सपिण्डीकृतं प्रेतं पृथक् पिण्डे नियोजयेत् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥

पुलस्त्यः ।

एकोद्दिष्टन्तु कर्त्तव्यं यावत्पित्रोः सपिण्डनं ।
ततः सपिण्डनादूर्द्ध्वमेकोद्दिष्टं निवर्त्तते ॥

प्रजापतिरप्याह ।

असपिण्डीकृतान् प्रेतानेकोद्दिष्टेन वर्त्तयेत् ।
सपिण्डीकरणादूर्द्ध्वं त्रिभिः सामान्यमुच्यते ॥

एतस्यैवमत एव धर्मः ।

पार्वणं पर्वकाले तु तथा कामार्थसम्पदा ।
सद्धौ वृद्धिविधानेन एकस्य सह योजनात् ॥

इति प्रतिपाद्योर्द्धञ्च सपिण्डीकरणादेकोद्दिष्टं न सम्भवतीत्याह स एव ।

समीतानां सदैकस्तु वर्त्तेत न कथञ्चन ।
सह संस्कारहेतुत्वात् पृथक्त्वं नोपपद्यते ॥

एवं सपिण्डीकृतस्यैकोद्दिष्टं निराकृत्य मासिकाद्येको-

औरसादिभिरपि प्रत्यब्दं मृताह्नि पार्वणं साग्निभिरेव कर्त्तव्यम् । यत आह मनुः ।

न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते ।
न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ॥

'दर्शेन' दर्शोपलक्षितेन विधिना, वर्जितं श्राद्धं आहिताग्निना न कर्त्तव्यं किन्तु दर्शश्राद्धविधिनैव कर्त्तव्यमित्यर्थः । न तु दर्श-श्राद्धं विनाऽन्यच्छ्राद्धमेव न कर्त्तव्यमिति व्याख्येयं । तथा सत्याह-श्राद्धादेरप्यभावप्रसङ्गात् ।

यमोऽप्याह ।

श्राद्धक्रियैकतान्तेषु प्रशस्तान् मनुरब्रवीत् ।
न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ॥

मनुः ।

दक्षप्रयस्तु ये विप्रा ये चैकाग्नय एव च ।
तेषां सपिण्डनादूर्द्धमेकोद्दिष्टं न पार्वणम् ॥

अत्रैकोद्दिष्टं नेति सम्बधः ।

अत एव कार्ष्णाजिनिः ।

अग्निप्रधानं सर्वेषामनुष्ठानं गृहाश्रमे ।
तद्योगात्कृतसामर्थ्याः सर्वत्राहन्नि पार्वणम् ॥

भविष्यत्पुराणे ।

वर्षे वर्षे तु कुर्वीत पार्वणं योऽग्निमान् द्विजः ।
कुर्यादनग्निमान् वीर एकोद्दिष्टं मृताहनि ॥

तस्मात्साग्निभिरौरस-क्षेत्रज-पुत्रिकापुत्रैः प्रत्यब्दं मृताहनि पार्वण-मेव कर्त्तव्यम् नैकोद्दिष्टमिति ।

